नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 20

No. of Printed Pages — 3

# VU—94–Sans. Vangmay (Supp.)

## वरिष्ठ उपाध्याय पूरक परीक्षा, 2013

### संस्कृत वाड्मय ( अनिवार्यः )

समय : 3 $\frac{1}{4}$ घण्टे

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

1. शिवराजविजयं कीदृशं काव्यमस्ति ? 1
2. शिवराजविजयस्य प्रतिनायक: कोऽस्ति ? 1
3. अम्बिकादत्तव्यासस्य पितामह: क: आसीत् ? 1
4. मेदपाटवसुधाया: क: पर्वत: गौरव प्रतीकोऽस्ति ? 1
5. मध्यमिका नगर्या: राज्ञ: नाम किमासीत् ? 1
6. चित्रकूटप्रदेशस्य वीरताया: वर्णनं कस्मिन् काव्येऽस्ति ? 1
7. रामपोलनामकं नगरद्वारं केन निर्मितमासीत् ? 1
8. ''लट: शतृशानचावप्रथमासमानाधिकरणे'' इति सूत्रस्य सोदाहरणमर्थो लेख्य: । 2
9. ''चतुर्थी तदर्थार्थबलिहितसुखरक्षितै:'' इति सूत्रस्य व्याख्या कार्या । 3
10. शिवराजविजयस्य भाषासौष्ठवं स्पष्टयत । 3
11. वीरभूमिकाव्ये कविना संस्कृतनिष्ठतया के नूतनशब्दा: प्रयुक्ता: ? तान् संक्षेपेण प्रकटयत । 3
12. अधोलिखितयो**रेकस्य** श्लोकस्य सप्रसंग व्याख्या विधेया — 4

(क) उत्तुङ्गभूमिधरमूर्द्धनि वैरिवर्ग -
वित्रासनं दृढ़तमं विनिवेश्य दुर्गम् ।
चित्राङ्गदक्षितिपतिर्निजनामधेय -
मुद्राङ्कितं तदकरोत्किल चित्रकूटम् ॥

(ख) श्रीनन्दनन्दनपदाम्बुरुहस्य भृङ्गी
मीराँ हरेर्निलयमुच्चमिमं चकार ।
यस्याग्रतो लसति मण्डपिकान्तरस्थं
तस्या गुरोश्चरणपङ्कजयुग्मचिह्नम् ॥

13. निम्नलिखितयो**रेकस्य** श्लोकस्य भावार्थो लेख्य: — 4

(क) निर्ह्रादि-निर्झर-गलज्जल-शीतलासु
वल्लीवितानविलसद्विटपाकुलासु ।
तिग्मांशुदीधितिभिरप्यविलोकितासु
गर्जन्ति यत्र हरयो गिरिकन्दरासु ॥

(ख) श्रान्तोऽसि दूरगमनेन तथापि मा भू:
स्तम्भाधिरोहणविधौ शिथिलप्रयत्न: ।
सञ्जायते चरमभूमिमधिश्रितानां
सद्योगिनामिव सदाऽविहतात्र दृष्टि: ॥

14. निम्नाङ्कितेषु **पञ्चवाक्यानां** संस्कृतभाषायामनुवादो विधेय: — 5 × 1 = 5

(i) पढ़ने के लिए रमा घर से विद्यालय आयी ।
(ii) कवियों में कालिदास श्रेष्ठ हैं ।
(iii) मित्र के साथ मोहन मन्दिर जायेगा ।
(iv) संस्कृत ही भारतीय संस्कृति का मूल है ।
(v) सदा सत्य बोलो ।
(vi) मोहन पढ़कर और सोहन लिखकर घर गये ।
(vii) आचारहीन को वेद भी पवित्र नहीं करते हैं ।
(viii) कुश से लव छोटा है ।

15. अधोलिखितेषु कमपि **एकं** विषयमवलम्ब्य 200 शब्देषु निबन्धं लिखत — 5

(i) मम प्रियपुस्तकम्

(ii) सत्सङ्गति: कथय किं न करोति पुंसाम्

(iii) संस्कृति: संस्कृताश्रया

(iv) वर्तमानयुगे सङ्गणकयन्त्रस्योपयोगित्वम् ।

16. निम्नलिखितेषु **पञ्चानां** पदानां संघटनां विधाय वाक्येष्वपि प्रयोगं कुरुत — $5 \times 1 = 5$

(i) पच् + क्त (ii) ग्राम + तल्

(iii) शप् + यत् (iv) यत् + त्रल्

(v) शोभन: पुरुष: (vi) प्रगत: आचार्य:

(vii) कुशाम्बेन निर्वृत्ता नगरी (viii) पाणी च पादौ च तयो समाहार: ।

17. निम्नांकितेषु गद्यांशेषु कयोश्चिद् **द्वयो:** सप्रसंग व्याख्या विधेया — $2 \times 4\frac{1}{2} = 9$

(क) अथैकदा रजन्यां सिंहदुर्गाविदूर एव सुकोमल-शादायां कलितप्रसादायां केकि-केका-विहित-प्रहरि-प्रातिनिध्यायां भुवि, निष्कृपकृपाण-पाणि:, कञ्चुकाच्छादित-कठिन-कवच:, कलित-सैनिकभट-वेष: श्रीशिववीरो गुप्तवेषेण परित: पर्य्यटन् , दुग्ध-धारयेव क्षालितैर्ज्योत्स्नया प्रकाशितै: पथिभिरासन्नात् शिवमन्दिरादारादाजगाम । तत्र च पौन: पुन्येन पतित्वा, भुवि विलुण्ठन्तं कञ्चनाश्वमद्राक्षीत् ।

(ख) ''कोऽयं, कुतोऽयं, चरो वा संदेशहरो वा, कपटपथिको वा, अस्मत्पक्षपाती वा, शत्रुपदातिर्वा, कोऽप्युभयपक्षोदासीनो वेति सद्य एव विज्ञेयम्'' इति विचारयन् , मन्दिर-पाश्चात्य-प्राचीन-गवाक्षादायान्तं कञ्चिदस्पष्टालाप-ध्वनिमश्रौषीत् । क्षणं विरम्य च, गवाक्ष-समीपमागत्य, ध्वनिप्रतिध्वनिर्भिरव्यक्तांश - बहुलामप्येवमुक्तिं निश्चिच्ये ।

(ग) आसीत् तत्रैवोपविष्ट एको वृद्धो वीरश्चान्द्रखाननामा । स तु केवलं रोचकमिदं मिथ्या-प्रशंसनमाकर्ण्य, कर्णयोस्तोद्यमान इव ग्रीवामाकुञ्च्य, भ्रू-युगं सन्नमय्य, ओष्ठ-युगं कम्पयन् , मनस्येव — ''धिगेतांश्चाटुकार-हतकान् , ये प्रशंसाभिरेव प्रभूनन्धयन्ति । प्रतिक्षणमधिकं जाज्वल्यते शिव-तिरस्कार-जन्या ज्वाला महाराष्ट्राणां हृदये । गानेषु पानेषु नृत्येषु कुकृत्येषु चास्मत्सजातीया एव सह युञ्जते, न तु महाराष्ट्र-सिंहा: ।

(घ) महादेवस्तु मुकुर-चित्र-पट्टिका-स्तम्भ-वितान-द्वार-कपाटाद्यवलोकनच्छलेन शनै: शनैर्निश्रेणी: कोष्ठानि प्राचीराणि शस्त्रागारं रक्षकावासं च यथाशक्ति गम्भीरमवालोकयत् । ''किमिवेतस्तत: पश्यसि ?'' इति पृष्टवति चान्यतमे रक्षके, 'न किमपि, अस्मिन्नेव पूर्वं शिववीर उवास, अधुना च सर्वं युष्माभिराक्रान्तमित्येव स्मृत्वा भवदैश्वर्यं विलोकयामि'' इत्युवाच ।

18. पचेलिमा:, कार्यम् , नन्दन:, जनमेजय:, सरसिजम् , द्रष्टुम् , कृति:, स्मारं-स्मारम् एषु **पञ्च** प्रयोगा: साधनीया: । $5 \times 2 = 10$

19. पञ्चगङ्गम् , कृष्णाश्रित:, पौर्वशाल:, अतिमाल:, अक्षशौण्ड:, पीताम्बरो हरि:, शिवकेशवौ, गवाक्ष: एषु **पञ्च** प्रयोगा: साधनीया: । $5 \times 2 = 10$

20. बाहीक:, गार्ग्यायण:, वैयाकरण:, आधिदैविकम् , पाणिनीयम् , धार्मिक:, दण्डी, लघिष्ठ: एषु **पञ्च** प्रयोगा: साधनीया: । $5 \times 2 = 10$